# अतिलोभी श्रृगालः

कस्मिंश्चित् वने कश्चन व्याधः एकदा मृगयार्थम् आगतवान् । बहुसमयानन्तरं सः एकं वराहं दृष्टवान् । तं लक्षीकृत्य सः बाणप्रयोगं कृतवान् । वराहस्य शरीरे महान् क्षतः जातः । व्रणितः वराहः कोपेन व्याधस्य उपरि आक्रमणं कृतवान् । स्वीयाभिः तीक्ष्णाभिः दंष्ट्राभिः तस्य शरीरं विदीर्णवान् । तेन व्याधः मृतः । क्षतेन रक्तनष्टेन च वराहः अपि मृतः ।

कश्चन लुब्धः श्रृगालः आहारान्वेषणं कुर्वन् तद् मार्गेण आगतवान् । व्याधस्य वराहस्य च मृतं शरीरं सः दृष्टवान् । तत् दृष्ट्वा सः चिन्तितवान् – 'अद्य मम भाग्यम् अनुकूलमेव। यथेष्टम् आहारः विनायासं लब्धः । एषः आहारः बहुदिनानां कृते पर्याप्तः भविष्यन्ति । अतः प्रतिदिनम् अपि किञ्चिदेव खादामि' इति ।

अनन्तरं सः व्याधस्य शरीरं निरीक्षितवान् । तस्य शरीरस्य पार्श्वे चापः आसीत् । चापे चर्मनिर्मिता रज्जुः बद्धा आसीत् । तत् दृष्ट्वा सः श्रृगालः 'अद्य एतां चर्मणः रज्जुं खादामि । अन्यत् सर्वं पश्चात् खादामि' इति चिन्तितवान् । चापस्य एकां कोटिं मुखे स्थापयित्वा सः दन्तैः रज्जुं दष्टवान् । परन्तु यदा रज्जुः भग्ना तदा चापस्य कोटिः श्रृगालस्य मस्तकं विदीर्य बहिः आगता । श्रृगालः तया प्रहारेण तत्क्षणे एव मृतः ।

* * *